বিদ্যাসাগর বিশ্ববিদ্যালয়

# VIDYASAGAR UNIVERSITY

## M.A. Examinations 2020
## Semester IV
## Subject: SANSKRIT
## Paper: SAN-404
(Theory)

**Full Marks: 40Time: 2HRS.**

*Candidates are required to give their answers in their own words as far as practicable.*

Answer any one question from Group A or B:

**Group-A**

**यथेच्छमेकः प्रश्नः संस्कृतेन देवनागर्या च समाधेयः**

1. मृच्छकटिकं नाटकमुत प्रकरणं सयुक्तिकमुपस्थापयत।
2. मृच्छकटिकमिति नामकरणे किं बीजं सविस्तरमालोच्यताम्।
3. चारुदत्तस्य चरित्रचारुत्वं चर्चयत।
4. मृच्छकटिकस्य रस-नायिकादिविचारः क्रियताम्।
5. वसन्तसेनायाः चरित्रचित्रणं कुरुत।
6. मैत्रेयस्य चरित्रचित्रं रचयतु।
7. संस्कृतसाहित्ये शूद्रकस्य स्थानं निर्धारयत।
8. मुद्राराक्षसनाटकस्य नामकरणं यथार्थं न वेति विचार्यताम्।
9. चाणक्यचरितं मुद्राराक्षसमाश्रित्य प्रस्तूयताम्।
10. मुद्राराक्षसमवलम्ब्य राक्षसचरितमुपवर्ण्यताम्।
11. मुद्राराक्षसनाटके प्रतिफलिता राजनीतिः संक्षेपेणालोच्यताम्।
12. मुद्राराक्षसस्य प्रथमाङ्कसारः संक्षेपतः लिख्यताम्।

**Group-B**

**यथेच्छमेकः प्रश्नः संस्कृतेन देवनागर्या च समाधेयः**

1. वेदान्तदर्शनस्य प्रथमसूत्रे अथ-शब्दस्यार्थः शङ्करीत्या प्रतिपाद्यताम्।
2. अथातो ब्रह्मजिज्ञासेति सूत्रे अधिकारिनिर्देशो वर्तते न वेति विचार्यताम्।
3. आनन्दमयशब्देन कस्य ग्रहणम्? जीवस्य अथवा परमात्मनः? अधिकरणसिद्धान्तमनुसृत्य पर्यालोचयत।
4. जन्माद्यस्य यतः इति वेदान्तसूत्रं प्रतिपदव्यावृत्तिपुरःसरं शाङ्करभाष्यानुसारं व्याख्यायताम्।
5. शास्त्रयोनित्वादिति सूत्रतात्पर्यं शाङ्करभाष्यमाश्रित्य प्रकाशयत।
6. तत्तु समन्वयात् इति सूत्रस्य अभिप्रायं यथाभाष्यं प्रकटयत।
7. अर्थसंग्रहानुसारं धर्मलक्षणं निरूप्य प्रतिपदव्यावृत्तिपुरःसरं तस्य व्याख्यानं कार्यम्।
8. भावनालक्षणं यथाग्रन्थं निरूप्य तस्य भेदान् वर्णयत।
9. विधेः किं लक्षणम्? कतिविधश्च सः? तत्र उत्पत्तिविधिस्वरूपमालोच्य ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यस्य कथं नोत्पत्तिविधित्वं तद् युक्त्या व्यवस्थाप्यताम्।
10. विनियोगविधिस्वरूपं समुल्लिख्य व्याख्याय च अस्य सहकारीणि प्रमाणानि उल्लिख्यन्ताम्। तेषु कस्य प्राधान्यं, कथं च?
11. अर्थसंग्रहदिशा प्रयोगविधेः स्वरूपं निरूपणीयम्।
12. को नाम विशिष्टविधिः? को वा गुणविधिः? सोमेन यजेत इति विधिवाक्यस्य सोमेन यागं भावयेत् इत्येवमर्थे कृते का हानिः? विस्तरेणोपपद्यताम्।

Vidyasagar U